ISSN: 2456–5474 RNI No.UPBIL/2016/68367 Vol.-6* Issue-4* May- 2021
Innovation The Research Concept

# विचारप्रक्रियायाः मनोवैज्ञानिकं विश्लेषणम्

# Psychological Analysis of Thought Process

Paper Submission: 04/05/2021, Date of Acceptance: 20/05/2021, Date of Publication: 22/05/2021



**कुलदीपसिंहः**
सहायकाचार्यः
शिक्षाशास्त्रम्
ज.रा.रा.संस्कृतविश्वविद्यालयः,
जयपुरम्राजस्थानम् भारतम्

**सारांश**

अस्मिन् शोधपत्रे विचारप्रक्रियां निरूप्य विचारस्य जीवने कः उपयोगः इति प्रतिपादितम्। विचारप्रक्रियायाः कानि मुख्यान्यङ्गानिवर्तन्ते ? विचारस्य कति भेदास्सन्ति ? प्रत्ययशब्दस्य कोऽर्थः ? कथं प्रत्ययानां समुत्पत्तिर्भवति ? विचाराणां भाषया सह कः सम्बन्धः ? कतिधा विचारपद्धतिः ? चेत्यादयविषयाः उदाहरणपुरस्सरं प्रतिपादितास्सन्ति । अन्ते भारतीयदर्शनानुसारं विचारस्यज्ञानस्य च प्राप्तये कति प्रमाणानि भवन्तीति उल्लिखितम् ।

In this research paper, the thought process has been represented, as well as what is its use in life, it has also been propounded. What are the main parts of the thought process? How many differences are there of thought? What is the meaning of the concept? What is the origin of ideas? What is the relation of thoughts with language? How many types of thought systems are there? Subjects have been exemplified. In the end, according to Indian philosophy, how much evidence is there for the attainment of thought and knowledge, it is also mentioned.

**मुख्यशब्दाः(Keywords).**विचारप्रक्रिया(Thought process) विचारप्रक्रियाया अङ्गानि(Parts of thought process) कल्पनात्मको विचारः(Imaginative thought)प्रत्यक्षात्मको विचारः(Perceptual thought) प्रत्ययात्मकोविचारः(Conceptualthought)प्रत्ययोत्पत्तिः(concept origin)विचाराणां भाषया सह सम्बन्धः ,(Relation of thoughts to language)।

**उद्देश्यानि(Objectives)**

मनोविज्ञानानुसारं विचारप्रक्रियायाः विवेचनेन बालकस्य कृते प्रारम्भिकस्तरे पाठ्यक्रमे केषां विषयाणाम् उल्लेखोभवेदिति प्रतिपादनम् । भारतीयदर्शने यथार्थानुभवाय प्रतिपादितानां प्रमाणानां विवेचनम्। मनोविज्ञानक्षेत्रे ये शोधकार्यं चिकीर्षन्ति तेभ्यः दृष्टिप्रदानम् ।

**प्रस्तावना**

विचारो नाम मनसः व्यापाराणां श्रेष्ठो व्यापार इति। अयं ज्ञानपक्षे प्रधानतामावहति। अत्रैव सर्वे मनोव्यापाराः अवसानं प्राप्नुवन्ति। प्रत्यक्षीकरण-स्मृति-कल्पनादीनां विचाराय साहाय्यप्रदानमेव परमप्रयोजनम्। मननात् मनुष्य: इति। मननात्मको विचारो मानवं पशुभ्यः पृथक्करोति। “मानवो हि विवेकवान् जन्तुः” इति अरस्तुमहोदयेन विवेकाख्यः विशेषपदार्थः मानवानां वैशिष्ट्य प्रदायकः इत्युपबोधितम्। विचारसामर्थ्येनैव मानवेन अवरेषु सर्वेषु जीवेषु स्वाधिपत्यं संस्थापितम्। विचारबलेनैव मानवः यथायोग्यं स्वपूर्वानुभवानां कार्येषूपयोगं कर्तुं समर्थो भवति, न पश्वादयः। पूर्वानुभवबलात्परिणामानुमानेन कार्येषु साफल्यं प्राप्नोति । ये जनाः परिणाममविचार्य कार्येषु प्रवर्तन्ते ते अविवेकिनः भवन्ति । मानवोचिताः व्यवहाराः आवेशवशात् अविवेकपुरस्सरं कदापि न भवन्ति । वस्तुस्तु विचार एव व्यक्तित्वनिकषः।

**विचारप्रक्रिया ( ThoughtProcess)**

समस्यानां समाधाने पूर्वानुभवानामुपयोगानुसन्धानतत्परः मनसः कार्यविशेषः विचारपदवाच्यः। संसारे यावत्यः समस्याः अनुभूयन्ते ताः ज्ञानविषयिण्यः व्यवहारविषयिण्यश्चेति द्विधा भवन्ति । यदा काचिद् समस्या उपस्थिता भवति तदा तत्समाधानाय पुरुषो यतते। तदानीं समस्यायाः समाधानमेव तस्य प्रथमं लक्ष्यं भवति। लक्ष्यस्योपस्थितिरेव विचारस्य प्रवर्तिका भवति । अतः विचारस्य हेतो लक्ष्यस्योदयः प्रथमसोपानम्। लक्ष्यसिध्यर्थं यत्नो विधीयते । अयमेव यत्नरूपः द्वितीयसोपानक्रम तः प्राक्समयोचितानां पूर्वानुभवानां स्मरणं भवति। प्रयत्ने सर्व:। पूर्वानुभवानां उपर्युक्तेषु चतुर्षु मानवस्य मानसिकप्रक्रिया तदनु भाषणं च अस्याः विचारप्रक्रियायाः पञ्चमो भागः

स्मरणात्मकोऽयं व्यवहारो विचारप्रक्रियायाः तृतीयांशः। अनुभवानां प्रकृत्यनुगुणं समुपयोगः विचारारम्भस्य चतुर्थांशः।इत्येवं प्रकारेण इयं विचारप्रक्रिया उपर्युक्तेषु पञ्चसु भागेषु प्रवहती विचारमधिगच्छति। कस्यामपि वृत्तौ मानवाः विचारपूर्वकमेव प्रवर्तन्ते ततश्च ते व्यावहारिकाः इति संज्ञां भजन्ते। पशुषु नायं विचाराख्यः सम्प्रत्ययः अतस्तेषां सर्वाण्यपिकार्याणि अविवेकयुतानि दोषपूर्णानि च भवन्ति। मानवः कार्यारम्भात्पूर्वं सम्भाव्यमानान् दोषान् विमृश्य तन्निवारणोपायान् च मनसा प्रकल्प्य कार्येषु व्यापृतो भवति। बाह्यव्यवहारात्पूर्वं व्यक्तिः आन्तरिकव्यापारं करोति। बाह्यव्यवहारस्तु मानसव्यवहारस्यानुकरणमेवास्ति। बाह्यव्यवहारात्पूर्वं मानवस्य योऽयं मानसिकव्यापारो जायतेस एव विचारपदवाच्यः।

**विचारप्रक्रियायाः सोपानानि (Stage of Thought Process)**

उपर्युक्तानुसारेण विचारप्रक्रियायां पञ्च सोपानानि -अन्तर्भूतानि सन्ति यानि इत्थं सन्ति

1. लक्ष्यस्य वाञ्छोदयः।
2. लक्ष्यसम्पूत्यर्थं आरम्भिकी चेष्टा।
3. पूर्वानुभवानां स्मरणम्।
4. पूर्वानुभवानां तात्कालिकसन्दर्भे प्रयोगः।
5. मानसमभिभाषणम्।

यथा कश्चिज्जनः भ्रमणाय विपणीमगच्छत् स्वयानञ्च कञ्चित्कालं यानस्थले )Parking अस्थापयत्। अत्रान्तरे केनापि तस्य ( यानं यानस्थलादपहृतम्। प्रत्यागत्य स यानस्थले स्वयानं न पश्यति। एवं तस्य सम्मुखे एषा नवीना समस्या उत्पद्यते समाधानाय च स प्रवर्तते। प्रथमं यानान्वेषणरूपकस्य लक्ष्यस्य सम्प्राप्तिनिमित्तम् इच्छा समुदेति। इदं प्रथममङ्गमस्याः प्रक्रियायाः। तदनन्तरं तदनुसन्धानार्थम् आन्तरिकं प्रयत्नमारभते। (मानसं)आदौ समीपस्थाः जनाः यानस्थलनिरीक्षकाः च प्रष्टव्याःतेषु कोऽपि न अपश्यत् इति विचिन्त्य ततः निवर्तते। मनसा एव , उपायान्तरं चिन्तयति । इदमनुचिन्तनम् अस्याः विचारप्रक्रियायाः पि मित्रस्य परिचितस्य द्वितीयमङ्गं भवति। ततश्च पूर्वं कदाचित् कस्या वा यानमपहृतं तत्स्मरति एवं पूर्वानुभवानां स्मरणाख्यं तृतीयमङ्गं भवति। गृहे अपहृतस्य यानस्य अपरा कुञ्चिकास्तीति मत्वा विनोदाय परिचितेनैव स्थानान्तरे यानं स्थापितं स्यादिति चिन्तयति अथवा कश्चिच्चौरः एवमेव यानमपहर्तुं शक्नोतीति पूर्वानुभूतं सर्वमपि क्रमशः स्मृतिमायाति। इदं सर्वं विचारप्रक्रियायाः तृतीयं सोपानं भवति। एतेषु अनुभवेषु सम्भाव्यमानस्य अवधारणं चतुर्थं सोपानं भवति। यतोहि पूर्वानुभवस्य उपयोग एव समस्यायाः समाधाने सहायको भवति। एतदनुसृत्य तस्य बाह्यचिन्तनं सममेव प्रवर्तते। विचारप्रक्रियायाः चतुर्ष्वप्यंगेषु मानसभाषणं विचारप्रक्रियायाः प्रमुखम् अङ्गं भवति।

अनेन प्रकारेण विचारप्रक्रियाया एका निश्चिता सरणिः भवति। लक्ष्यमारभ्य मानसभाषणं यावत् पञ्चाङ्गान्विता विचारप्रक्रिया समस्यायाः समुपबृंहिता। वस्तुतः उपर्युक्तमुदाहरणं व्यवहारविषयिण्याः वर्तते। अस्माकं मानसे तु ज्ञानविषयिणी विचारप्रक्रियापि प्रवर्तते। कस्यापि नूतनविषयस्य अध्ययनाय कश्चिज्जनः यदा प्रवृत्तो भवतितदा , तत्सम्मुखे ज्ञानविषयिणी समस्या समुद्भवति। एतस्याः समस्यायाः प्रवर्तन्ते एव। समाधानेऽपि पूर्वोक्तानि सर्वाण्यपि अङ्गानि यथाक्रमं पुरातना अनुभवा एव सर्वदानूतनसमस्यानां समाधाने उपयुज्यन्ते। तेऽनुभवाः स्वीयाः स्युः परिचितानां मित्राणां वा स्युरितिन तत्र विशेषो , भेदः। पूर्वानुभवैः वर्तमानस्य प्रसंगस्य साधर्म्यं परिशीलयति। तदनुसारं जिज्ञासाभिवर्तते मनस्तोषश्च जायते परिणामप्राप्तये प्रयतते यत्र व्यक्तेः तत्रैव विचारप्रक्रियापि विरमति। विचारप्रक्रियायां जनः साधर्म्यं वैधर्म्यं - च परिशीलयति।

**विचारभेदाः (Types of Thoughts)**

-विचारस्य त्रयो भेदास्सन्ति। यथा

1. प्रत्यक्षात्मकविचारः।
2. कल्पनात्मकविचारः।
3. प्रत्ययात्मकविचारश्चेति।

बालेषु पशुषु च प्रत्यक्षात्मको विचारभेदः उपलभ्यते। दण्डकरान्वितं जनं दृष्ट्वा पशवः पलायन्ते तृणपूर्णकरं दृष्ट्वा च तदभिमुखाः प्रवर्तन्ते। एवमेव सामान्यजनाः अपि क्रोधदृष्टियुतान् भुशुण्डिखड्गोपेतान् जनान् अवलोक्य ततः पलायन्ते इदं पलायनं विचारस्यैव फलतया परिणमते।

विचारस्य द्वितीयोभेदः कल्पनात्मको भवति यथा प्रत्यक्षात्मकविचारः प्रत्यक्षाश्रितो भवति। एवमेव कल्पनात्मको विचारः प्रतिमाश्रितो भवति प्रत्यक्षात्मकेन ज्ञानसंस्कारेण तत्प्रतिमा मानसपटलेऽङ्किताः भवन्तीति स्पष्टमेव ताः प्रतिमा एव कल्पनात्मकविचारस्य प्रवर्तिकाः भवन्ति यथाकश्चिज्जन -ः विपणितः गृहमायाति तदा बालेभ्यः कन्दुकादीनि क्रीडनकानि आनयति अत एव शिशुर्यदा विपणिगतस्य पितुर्विषये चिन्तयति तदा पूर्वानुभवस्य स्मरणं कृत्वा अद्यापि मम पिता मत्कृते क्रीडानकानि आनेष्यतीति भावयति। संस्काराश्रितः अयं विचारः कल्पनात्मको विचारो भवति।

विचारस्य तृतीयो भेदोऽस्ति प्रत्ययात्मकः अयञ्च न प्रत्यक्षेण नापि स्मृत्या अपितु प्रत्ययैः सञ्चालितो भवति। नामादिसम्बद्धं ज्ञानमत्र प्रत्ययपदस्य वाचकम्। प्रौढानां जनानां सर्वोऽपि विचारः प्रत्ययात्मको भवति ते भाषयैव विचारयन्ति। अतः प्रौढानां विचारः प्रत्ययात्मको भवति।

एवं बालानां पश्वादीनाञ्च विचारः प्रत्यक्षात्मकः , आधारेण :प्रतिमाया (प्रत्यक्षसंस्कारेण) मानसपटले अङ्कितायाः प्रौढजनानां विचारः प्रत्ययात्मकः इति स्पष्टम्। ,कल्पनात्मकः विचारः

**प्रत्ययोत्पत्तिः (Origin of Concept)**

पदार्थानां तदनुगुणानां वा प्रत्यक्ेषण नामजात्यादियुतं ज्ञानं प्रत्ययपदवाच्यं भवति तच्च शब्दैरेव व्यपदिश्यते। जातिवाचकाः भाववाचकाश्च संज्ञाशब्दाः प्रत्ययपदवाच्याः। प्रत्ययस्य उत्पत्तौ चत्वारि साधनानि भवन्ति।

1. पदार्थानामनुभूतिः।
2. पदार्थस्य गुणविश्लेषणम्।
3. पदार्थानां वर्गीकरणम्।
4. पदार्थानां नामकरणम्।

1. **पदार्थानामनुभूतिः -**बहवः शब्दाः लोके तादृशाः वर्तन्ते, येषामर्थाः कदापि न दृष्टाः। यथा सिंहशब्दः बालैरपि प्रयुज्यते किन्तु बहुभिः बालैः सिंहो न दृष्टः। तेषामयं शब्दः कदापि यथार्थप्रत्ययं न जनयति यतोहि शब्दस्य प्रत्ययजनने अर्थस्यानुभूतिः अपरिहार्या भवति। पूर्वमर्थोऽनुभूयते ततश्च नामादिसंयुतं ज्ञानं सञ्जायते। तदनु च शब्दस्य व्यवहारप्रत्ययस्योत्पत्तिः। अतः शब्दस्य प्रत्ययाय अर्थानुभूतिः अपेक्षिता भवति।

2. **पदार्थानां गुणविश्लेषणम्-** समानजातीयेभ्यः असमानजातीयेभ्यश्च परस्परं तुलनया गुणविश्लेषणसामर्थ्यमागच्छति । अत एव दर्शने "समानासमानजातीयव्यवच्छेदो हि लक्षणार्थः" इति लक्षणस्य प्रयोजनमपि प्रतिपादितम् ।
3. **पदार्थानां वर्गीकरणम् -(**शब्दानां)वर्गीकरणं (पदार्थानां) प्रत्ययस्योत्पत्तौ तृतीयं निमित्तं भवति । कस्यापि शब्दस्य सामान्यार्थमवगत्य तत्समानाः यावन्तः शब्दाः वर्तन्ते तेषामेकस्मिन् वर्गे स्थापनम् ।
4. **पदार्थानां नामकरणम् -**समानजातीयान् अर्थान् एकस्मिन् वर्गे संस्थाप्य विशिष्टं नामकरणं क्रियते नामादियुक्तं वस्तुज्ञानं प्रत्ययपदवाच्यं ततश्च प्रत्ययोत्पत्तिर्जायते ।

**भाषया सह विचाराणां सम्बन्धः (Relation of Thoughts with Language)**

विचारात्परं भाषणमपि भाषात्मकमेव भवति । यथा यथा ज्ञानं वर्धते तथा तथा शब्दभाण्डारस्यापि अभिवृद्धिर्भवति । विदुषां शब्दज्ञानमितरेभ्यो विशिष्टं भवति सामान्यजनानां ज्ञानं परिमितं भवति। शब्दानां परिज्ञानेनैव तत्सम्बद्धानां ज्ञानस्य विचाराणाञ्च परिचयः सुकरो भवति । विचाराणां प्रकाशनं भाषयैव सम्भवति । प्रकाशनेन विचाराः सुदृढाः जायन्ते ।

विचारप्रक्रियायां निगमनात्मिका आगमनात्मिका चेति द्विविधा विचारपद्धतिः तर्कशास्त्रे प्रतिपादिता । उभाभ्यामेव विचारप्रक्रिया सुदृढा अनेकविधा च जायते ।

यथार्थानुभवः" भारतीयदर्शने तुप्रमाइत्युक्त्वा प्रमाकरणं " प्रमाणमिति प्रतिपादितम्। तच्च प्रमाणं चतुर्विधं प्रत्यक्षानुमानोपमानशब्दप्रमाणानि इति उक्त्वा विभिन्नैः उदाहरणैः ज्ञानावाप्तये एतेषां योगदानं प्रतिपादितम् ।

इत्थं विचारप्रक्रियायाः मनोवैज्ञानिकचिन्तने उपर्युक्तानामंशानां महद्य़ोगदानं वर्तते इति ।

**सन्दर्भाः (References)**

1. *अग्रवाल, पद्मा, मनोविज्ञान और शिक्षा, मनोविज्ञान प्रकाशन 56-25 चौक, बनारस 1954 ।*
2. *जेल्डर्ड, एफ.एः द ह्यूमन सेन्सेस, न्यूयार्क, वार्हली 1953 ।*
3. *पाण्डेय के. पी., नवीन शिक्षा मनोविज्ञान, विश्वविद्यालय प्रकाशन, वाराणसी 2019 ।*
4. *बर्नार्ड हेरोल्ड, डब्ल्यूः साइकोलॉजी ऑफ लर्निंग एण्ड टीचिंग, मैक्ग्रा हिल बुक कम्पनी 1972 ।*
5. *बुचर एच.जे., ह्यूमन इन्टेलिजेन्स, इट्सनेचर एण्ड असेसमेण्ट, मैथ्यून एण्ड कम्पनी लि.1968।*
6. *लूम्बा, राममूर्तिः मनोविज्ञान के क्षेत्र, हिन्दी समिति, सूचना विभाग, उत्तरप्रदेश 1964 ।*
7. *विश्वेश्वर, मनोविज्ञान मीमांसा, आत्माराम एण्ड सन्स, दिल्ली 6, 1959 ।*
8. *हाइमन, रोनाल्ड टी., कान्टेम्पोरेरी थॉट ऑन टीचिंग, प्रेन्टिस हाल 1971 ।*